॥ ॐ नमः शिवाय ॥

अथ

# * काश्यपस्मृतिः *

## प्रायश्चित्तवर्णनम्

### अथ काश्यपीयान् गृहस्थधर्मान् व्याख्यास्यामः

आहिताग्निः स्वदारनिरतोऽच्चाग्न्यग्निहोत्री स्नातामृतुकालगामी देवपितृमनुष्यभूतब्रह्मयज्ञानुसेवमानः एकद्वित्रिचतुर्णां ब्राह्मणान् कुर्वाणो व्रतनियमहोमजाप्यपरो मातृपितृभक्तो दारापत्यपोषकः शेषानुभोजी उपवासी त्रैवर्णिकमेदकसूतकान्नपरिहरमाणोऽलांगल-वृत्तिः। तत्र च भूम्यपोढने वृक्षच्छेदने नास्यधर्मोभवति। कूपसेतुतड़ागविप्रदेवतायतनभेदने प्रायश्चित्तं ब्राह्मणेभ्यो निवेद्य चतस्रआहुतीर्जुहुयात्।

इदं विष्णुरिति प्रथमा, मानस्तोक इति द्वितीया, स्ववासा इति तृतीया, दंष्ट्राभ्यामिति चतुर्थीरत्यस्रपोढयेत् तस्यैव देवतायै पूर्णाहुतिं जुहुयात्।

अथ गोबलीवर्दमहिषधूर्याविकहिंसावाप्तौ प्रायश्चित्तकामका-रतामित्येके। दोग्धृदमनपर्यस्तपाषघट्टनघंटाभरणभूषणयोजन तैल-मंडौषधभेषज्यत्रितयमाणे व्याप्तानामकामावाप्त्यै ( प्तौ ) प्रायश्चित्तं-

ब्राह्मणेभ्यो निवेद्य सशिरक्षुरवपनं कृत्वा प्राजापत्यं कृच्छ्रमाचरेत्। चीर्णांते गां दद्यात्। तिलधेनुं जलधेनुं चेतिकाश्यपः।

अथ मृगमहिषगंडुकवराहशरभऋक्षसिंहव्याघ्रमंडूकशूकर मत्स्यग्राहशिशुमारादीनां वधेष्वहोरात्रं। चीर्णांते गां दद्यात्। मेष स त्रिरात्रं चीर्णान्ते हिरण्यं दद्यात्।

अथ काक-वलाक-हंस-सारस-कारण्डव-चक्रवाक-गृध्रश्येन-खंजरीट-टिट्टिभोलूक-शुक सारिकामयूरकाक-मद्र कलविंक-कपोत कपिंजलादीनां वधेष्वहोरात्रं। चीर्णान्ते तिलान्दद्यात्।

अथातः श्व-जम्बूक-विडाल—ऋषभरक्षुवासतोष्ट्र शूद्रवधे त्रिरात्रं च प्रायश्चित्तं ब्राह्मणेभ्यो निवेद्य प्राजापत्यं कृच्छ्रं चरेत्। चीर्णान्ते सव्रीहीन् दद्यात्।

कृकलास-सर्पनकुल-विडालगोजावधे त्रिरात्रं चीर्णान्ते लोहं दद्यात्।

येषां व्यापादने प्रायश्चित्तमुक्तं तेषामेवोच्छिष्टभोजने प्राणायामशतंकृत्वा घृतं प्राश्य शुद्धः स्यात्।

जातमृतकसूतके ब्राह्मणो दशरात्रेण, क्षत्रियः पंचदशकेन, वैश्योविंशतिरात्रेण, शूद्रो मासेन शुद्ध्यति। तच्चेदंतःपुरवापतंति तत्समेन शुध्यावस्वहः। अब्राह्मणो न जायते, नाधीयीत, नाध्यापयेत्, न दद्यात् न प्रतिगृह्णीयात्। अशुचिर्द्विपदे चतुष्पदे। नादितदहः।

अथानशनमृतानामशनिहतानां वा अग्निप्रविष्टानां भृगुपतनसंग्रामदेशांतरमृतानां वा गर्भविनिःसृतानां त्रिरात्रेण शुद्धिरुच्यते।

अथ लशुन-पलांडुगृञ्जन-कुंभीकुक्कुटभक्षणे सुरासीधुमधुमद्यपाने अयाज्ययाजने पतितसावित्र्युपनयने तैः प्रायश्चित्तं ब्राह्मणेभ्यो निवेद्य यत्र ग्राममृगाणां पशूनां शब्दो न श्रूयते तस्मिन्प्रदेशे अग्निं प्रणिपरिसमुह्य पर्य्युपरिस्सर्य सशिखवपनं कृत्वा प्राक् प्रणीतेन विधिना पुनः संस्कारमर्हन्तीति ।

## अथ पंचमहापातकाः प्रवक्ष्यन्ते—

ब्राह्मणो नैव हन्तव्यः स्वस्वप्रक्षेपया द्विजैः ।
सुवर्णहरणं चैव कर्तव्यं न कथंचन ॥ १ ॥
गुरुपत्नीं न गच्छेत संस्पर्शश्च न तैश्चरेत् ।
महापातकसंज्ञेया निर्दिष्टानां मनीषिभिः ॥ २ ॥
वत्सरत्रितयं कुर्यात् नरः कृच्छ्रं विशुद्धये ।
आत्मतुल्यसुवर्णं च दद्याद्वाविप्रतुष्टिकृत् ॥ ३ ॥

आत्रेयीगर्भं राजन्यवैश्यौ यज्ञगतौ हत्वा एतदेवकुर्यात् ।

## अथाकालि(क)व्याख्यास्यन्नाह—

अविनिरटकविद्य तवज्रनिर्घातप्रपतने भूमिचलने चैवाथनिम्नोत्तरे चैव प्रायश्चित्तं ब्राह्मणेभ्योनिवेद्य समीमयीनां समिध मधुदधिघृताक्तानामष्टसाहस्रं जुहुयात् । शन्नोदेवीति काश्यपः ।

यत्र वेश्मनि उलूकोनिपतति । गृहं गोधाकपोतः प्रविशति । कृष्टः शकुनिः श्येनो वा रथभुज्ये(ध्वजे)वानिपतति । वल्मीक दीपिकागृहे पुरो ददति । शृगापुरोहणे कपाटघंटापुरोहणे चैव प्रायश्चित्तं

ब्राह्मणेभ्यो निवेद्य शमीमयीनां समिधदधिमधुघृताक्तानामष्ट-सहस्रं जुहुयात्, वास्तोस्पते इति काश्यपः ।

## अथ नैमित्तिकानि व्याख्यास्यामः—

क्षीरभाण्डभेदने मंथने भंजने पुरोहललांगल गलचक्रतूपपतने रथविपर्य्यासने अश्व(अस्त्र)भंजने रजस्वला-शवस्पर्शने आदित्या-स्तमने संदमंदेदुःस्वप्रदर्शने कर्णकेशपतिपुरोहणे पू(यू)पस्थलस्पर्शन मृतकसूतक भोजने चैव ब्राह्मणेभ्यो निवेद्य सचैले कृत्वा स्वप्रतिरथं जपेदिति काश्यपः ।

## अथातः पात्राणां शौचविधिं व्याख्यास्यामः—

पलेखने(?)न दारुपत्रे भस्मनांकांस्यं शीश्रुताम्रायसानां सिक-ताभिः शौचं। दंतशंखमणिराजतसौवर्णानां घर्षणं। मृण्मयानां पुनर्दहनं। धान्यवासमां वहूनां प्रोक्षणं काष्ठ रज्जुत्वक्चर्म चीर वेणु विदलपत्रपर्णानां चलवच्छौचम् ।

## अथ पूर्वं पापकर्मणां चिह्नं व्याख्यास्यामः—

अगम्यागामी दुश्चर्मा तस्मात्प्रायश्चित्तं वेदात्मविशुद्धये। एतान् श्राद्धे परिवर्जयेत् ये चान्ये पंक्तिदूषकाः। क्षट्टघटा चा घटा-नटा प्रव्रजितरंगारतानिदेवलकनक्षत्रजीवकग्रामयाजकपर्य्याहित-पर्य्याधारकविविंदकपौनर्भवानाश्नंति। अदन्तादेके नाश्नंति। भार्याजितस्य नगरग्रामयाजकेभ्यः अविश्रस्तघाती व्यंगोनक्षत्र सूचकाः।

वर्जनीयाद्विजाह्यते श्राद्धकर्मसु नित्यशः ।
दाराधीनाः क्रियाः सर्वा दाराः स्वर्गस्य साधनं ॥ ४ ॥

इत्येतत्ब्रह्मणाप्रोक्तं काश्यपस्यानुशासनम् ।
सप्त पौनर्भवा कन्या वर्जनीया कुलाधमाः ॥ ५ ॥

वाचा दत्ता मनोदत्ता कृतमंगलकौतुका ।
उदकस्पर्शका या च या च पाणिग्रहीतिका ॥ ६ ॥

अग्न्युपायं गता या च पुनर्वाह्यस्य वादिका ।
इत्येताः कश्यपप्रोक्ता दहेयुः कुलमग्निवत् ॥ ७ ॥

प्ररोहत्यग्निमादाय पादपानां कुलंमहत् ।
न हि पुनर्भवादीनां कुलं तस्य प्ररोहति ॥ ८ ॥

पिता वा यदि वा भ्राता माता वा यदिवेतरः ।
नरश्च कृतपापानां गति यां याति तां शृणु ॥ ९ ॥

मनिवर्ती यथा श्येनो गच्छत्येव यमालयं ।
एवं च नरकं याति कन्या अमृतकारका ॥१०॥

पुनः सम्पद्यते नारी गतमात्मानमात्मनि ।
अस्थिमात्रं त्वचं भित्वा शुक्रं तेजोबलं तथा ॥११॥

शुद्धिं न ये प्रयच्छंति दुहितरं लोभमोहिताः ।
तेषां तु नरके घोरे याति वै सप्तमं कुलम् ॥१२॥

गमनागमनायोगात् एवं शुक्रे विधीयते ।
एवं ज्ञात्वा युक्तकन्यां विंदेत स तत्कुलात् ॥१३॥

नस्याद्दैवे च पित्र्ये च दासीस्यादथ संचिता ।
क्रयक्रीता तु सा दासी न सा पत्नी विधीयते ॥१४॥

अग्निष्टोमातिरात्राणां शतं शतगुणी कृतम् ।
प्राप्नोति पुरुषोदत्वा होममंत्रै रलंकृताम् ॥१५॥

यस्तु सात्यम(सात्त्विक)धर्मेण पिता समर्पयेत् सुताम् ।
स प्रेत्य लभते स्थानं यथा दक्ष ! प्रजापतिः ॥१६॥

इति काश्यप प्रणीतं धर्मशास्त्रं समाप्तम् ।

THE

# SMRITI SANDARBHA

**Collection of Thirteen Dharmashastric Texts by Maharshis.**

## Volume IV

NAG PUBLISHERS

**NAG PUBLISHERS**

11.A/U.A. JAWAHAR NAGAR (P. O. BUILDING)
DELH-I110007